Gyanshauryam, International Scientific Refereed Research Journal
© 2021 GISRRJ | Volume 4 | Issue 2 | ISSN : 2582-0095

# स्त्रीप्रत्ययपरिचयः

**डॉ0 सन्तोष माझी**
सहाध्यापकः, व्याकरणविभागः
राष्ट्रियसंस्कृतविद्यालयः, तिरुपतिः (आ. प्र.)

**Article Info**
Volume 4 Issue 2
Page Number : 144-150

**Publication Issue :**
March-April-2021

**Article History**
Accepted : 02 March 2021
Published : 15 March 2021

**सारांशः** – पदसाधुत्वबोधकं व्याकरणम् इति सर्वे अङ्गीकुर्वन्ति। तत्र पदानि द्विविधानि दृश्यन्ते। १. तिङन्तानि २. सुबन्तानि। तिङ् अन्ते येषां तानि – तिङन्तानि। उदा –भवति, पचति, विद्यते, पाठयति, गमयति, चिकीर्षति। सुब् अन्ते येषां तानि – सुबन्तानि। उदा – रामः, हरिः, सखा, खट्वा, माता, भ्राता, इत्यादयः। एषु सुबन्तपदेषु त्रिधा लिङ्गभेदः दृश्यते। १. पुँल्लिङ्गम्, २. स्त्रीलिङ्गम्, ३. नपुंसकलिङ्गम् इति।

घञवन्तः, घाजन्तश्च (लिङ्गानुशासनम्) इति सुत्राभ्यां घञ्, अच्, अप्, एतत्प्रत्ययान्ताः पुंस भवन्तीति प्रत्यपीपदत्। तथा **स्त्रियां क्तिन्**[1] (3.3.94) इत्यनेन क्तिन्नन्ताः स्त्रीत्वे भवन्तीति असूचयत्। एवं **नपुंसके भावे क्तः**[2] (3.3.1143) इत्यनेन भावक्तान्तो, नपुंसके भवतीति अवोचत्। सूत्रकार एवंरीत्या शास्त्रे लिङ्गनिर्णयं चकार। परन्त्वेते कृत्प्रत्ययाः। विशिष्य पुनः **स्त्रियाम्** इत्यधिकारः आरब्धः। लिङ्गमेवं शास्त्रे निर्णीयते। नात्र लौकिकार्थबोधकत्वेन तत्तलिङ्गव्यपदेशः। पदार्थमात्रे सत्त्वरजस्तमोगुणाः विद्यन्ते। तेषां गुणानाम् उपचयाऽपचयसाम्यावस्थाभिः शास्त्रकारैः लिङ्गनिर्णयः कृतः। तेषामुत्कर्षे पुंस्त्वम्, उपचये स्त्रीत्वम्, तेषां स्थितिमात्रविवक्षायां नपुंसकत्वमिति व्यवह्रियते। तत्र शिष्टव्यवार एव प्रमाणम्। यदाऽऽह भर्तृहरिः –

**भावतत्त्वविदः शिष्टाश्शब्दार्थेषु व्यवस्थिताः।**
**यद्यद्धर्मे गतमिति तत्तल्लिङ्गं प्रचक्षते।।**[3]

वृक्षः, प्लक्षः, दाराः इत्यादिषु सर्वेषां गुणानामुत्कर्षो वर्तत इति, वाक्, गीः, पूः, इत्यादिषु गुणानामपकर्षो वर्तत इति, कलत्र, भय, लिङ्गादिशब्देषु गुणानां स्थितिमात्रविवक्षा वर्तत इति तत्तल्लिङ्गव्यवहारं शास्त्रकाराः निरणैषुः।

लोके दाराशब्दः स्त्रीं बोधयति, परं पुँल्लिङ्गे विद्यते। कलत्रशब्दोऽपि स्त्रीं बोधयति, परं नपुंसकलिङ्गेऽस्ति। मित्रशब्दः सुहृद्वाचकः नपुंसकलिङ्गे दृश्यते, परं तेन स्त्रीपुरुषावुभौ बोध्येते। अतो लोके व्यवह्रियमाणः –

---

1 अष्टाध्यायी– 3/3/94

2 तत्रैव– 3/3/114

3 वाक्यपदीयम्

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

**स्तनकेशवती स्त्री स्याल्लोमशः पुरुषः स्मृतः।**

**उभयोरन्तरं यच्च तदभावे नपुंसकम्।।**[4]

इति लक्षणानि न ग्राह्याणि, किन्तु शास्त्रीयं पूर्वोक्तमेव ग्राह्यम्।

**मुख्यशब्दः**- स्त्रीप्रत्ययपरिचयः, संज्ञा, विशेषणः, प्रत्ययः, व्याकरणग्रन्थः, प्रातिपदिकम्।

पाणिनीये विशिष्य **स्त्रियाम्**[5] (4.1.3) इत्यारभ्य अष्टौ प्रत्यया उपदिष्टाः। तेषां स्त्रीप्रत्ययाः इति व्यवहारः समजनि। प्रायः स्त्रीप्रत्ययसत्त्वे स्त्रीत्वबोधो दृश्यते। क्वचित् तदभावेऽपि स्त्रीत्वं बुध्यते। यथा – वाचु, दिश् इत्यादिषु। अत एते द्योतकप्रत्ययाः इति व्यवह्रियन्ते। यथाक्रमं ते निरूप्यन्ते। अष्टौ प्रत्यया एवं सन्ति –

| | |
|---|---|
| 1. टाप् | 5. ङीष् |
| 2. डाप् | 6. ङीन् |
| 3. चाप् | 7. उङ् |
| 4. ङीप् | 8. ति |

| लुप्यमानः अंशः | दृश्यमानः अंशः | लुप्यमानः अंशः |
|---|---|---|
| ट् + | आ + | प् |
| ड् + | आ + | प् |
| च् + | आ + | प् |
| ङ् + | ई + | प् |
| ङ् + | ई + | ष् |
| ङ् + | ई + | न् |
| ---- | ऊ + | ङ् |
| ---- | ति | ---- |

एवञ्च आ, ई, ऊ, ति सुबन्तपदानामन्ते विद्यते चेत् प्रायः स्त्रीप्रत्ययान्तसुबन्तपदाननि भवन्तीत्यवगन्तुं शक्यते। टाप्, डाप्, चाप्, ङीप्, ङीष्, ङीन्, इत्यत्र विद्यमानानां तत्तद्वर्णानां प्रयोजनं शास्त्रे भवति, लोके भाषायां न तथा प्रयोजनम्।

**1. टाप् –** अज इत्यारभ्य केचन शब्दाः पठिताः, तेभ्यः एवम् अकारान्तशब्देभ्यः स्त्रीत्वविवक्षायाम् अयं प्रत्ययो भवति।

अज+टाप् (आ) सवर्णदीर्घः अजा, अस्याः प्रापतिपदिकसंज्ञायां स्वादयो भवन्ति।

अजा-अजे-अजाः इत्याकारान्तस्त्रीलिङ्गशब्दो भवति।

अजा – अज + टाप् (आ)

4 वैयाकरणसिद्धान्तकौमुदी

5 अष्टाध्यायी- 4/1/3

एडका – एडक + टाप् (आ)

अश्वा – अश्व + टाप् (आ)

चटका, मूषिका, बाला, वत्सा, होडा, मन्दा, विलाता, इत्यादयः। मेधा, गङ्गा, सर्वा इत्यादय आकारान्ताः।

**2. डाप् –** मन्नन्तप्रादिपदिकेभ्यः डाप् प्रत्ययो भवति। यथा – सीमन्, दामन्। सीमन् + डाप् (आ), सीमन् + आ, डापः डित्त्वाट्टिलोपः (अन्) सीम् + आ सीमा अस्याः प्रातिपदिकसंज्ञायां स्वादयो भवन्ति। सीमा – सीमे – सीमाः। दामा – दामे – दामाः इत्याकारान्तस्त्रीलिङ्गशब्दरूपाणि भवन्ति।

**3. चाप् –** यङ् इति कश्चन तद्धितप्रत्ययोऽस्ति। तदन्तेभ्यः स्त्रियां चाप् भवति। अत्र ञ्यङ्ष्यङोः यङ्–पदेन ग्रहणम्। अवचशब्दस्यापि अयं प्रत्ययो भवति। आम्बष्ट्य इति ञ्यङ्, कारीषगन्ध्य इति ष्यङ्प्रत्ययान्तौ, ताभ्यां चाप्प्रत्ययो भवति। आम्बष्ट्य + आ, कारीषगन्ध्य + आ इति आकारान्तस्त्रीलिङ्ग–शब्दरूपाणि भवन्ति। अवट इत्यस्मात् घञ् आवट्य + चाप् – आवट्या इति आकारान्तस्त्रीलिङ्गो भवति।

**4. ङीप् –** ऋकारान्तेभ्यो, नान्तेभ्यः उगिदन्तप्रातिपदिकेभ्यः, यञ् (तद्धित) प्रत्ययान्तेभ्यः, टकारेत्संज्ञकप्रत्ययान्तेभ्यः, ढ, अण्, अञ्, द्वयसच्, दघ्नञ्, मात्रच्, तयप्, ठक्, ठञ्, कञ्, क्वरप् – प्रत्ययान्तप्रादिपदिकेभ्यः अयं प्रत्ययो भवति। प्रथमवयोवचाचिनोऽदन्तात्स्त्रियां ङीप् भवति, एवमेव अदन्तद्विगोरपि अयं प्रत्ययो भवति।

**अ) ऋकारान्तेभ्यः** – कर्तृ + ङीप्, कर्तृ + ई – कर्त्री (सुबादयः) कर्त्री – कर्त्र्यौ – कर्त्र्यः।

**आ) नान्तेभ्यः** – दण्डिन् + ङीप्, दण्डिन् + ई – दण्डिनी (सुबादयः) दण्डिनि – दण्डिन्यौ – दण्डिन्यः।

**इ) उगिदन्तेभ्यः** – भवतु इति उगित् प्रातिपदिकम् तस्य ङीप्–प्रत्यये भवत् + ई, भवती + सु, नुम् इत्यागमो भवति प्रातिपदिकस्य, भवन्त + ई – भवन्ती + स्, सुलोपः, भवन्ती, पचन्ती, दीव्यन्ती, इत्यादिरूपाणि भवन्ति।

पच् धातोः लट्, तस्य शतृप्रत्ययः पच् + शतृ, अत्र प्रत्ययः उगित्, (पच्+ अत् + ङीप्) अतः पचत् + ङीप्, पचत् + ई, पचत् + ई + सु अत्रापि नुमागमः, पचन्त् + ई + स्, सुलोपः पचन्ती इति रूपं भवति।

दिव् धातोः लट् लकारः, अयं दिवादावस्ति, ततः शतृप्रत्यये, दिव् + श्यन् + शतृ + ङीप् (दिव् + य + अत् + ई) धातोः दीर्घे, नुमागमे दीव्यन्ती + सु सुलोपः दीव्यन्ती इति रूपं भवति।

**ई) यञन्तेभ्यः –** 'गर्गादिभ्यो यञ्' इत्यनेन गर्गादिभ्यः शब्देभ्यो यञ् तद्धितप्रत्ययो विहितः गार्ग्य इति यञन्तः, तस्मात् ङीप्, गार्ग्य + ङीप्, गार्ग्य + ई, तद्धितयकारस्य लोपः, गार्गी + स्, सुलोपः, गार्गी इति भवति।

**उ) टकारेत्संज्ञकप्रत्ययान्तेभ्यः –** चरेष्टः इत्यनेन चर–धातोः ट इति कृत्प्रत्ययो विहितः। कुरुषु चरतीत्यर्थे सप्तम्यन्ते उपपदे चर् धातोः टो भवति, चकारस्येत्संज्ञा भवति। अतः अनेन ङीप्, कुरुचर + ई, कुरुचरी + स्, सुलोपः। कुरुचरी – कुरुचर्यौ – कुरुचर्यः इति रूपाणि भवन्ति।

नदट् इति टित् प्रातिपदिकम्, तस्मात् टित्त्वात् ङीप्। नदी – नद्यौ – नद्यः इति रूपाणि भवत्ति।

**ऊ) अणन्तेभ्यः –** अण् प्रत्ययः कृत्सु विद्यते, यथा – कुम्भकारः इत्यत्र। तद्धितेष्वपि, यथा – औपगवः, शैवः इति। उभाभ्यामप्यणन्ताभ्यां स्त्रीत्वे, ङीप् भवत्येव, कुम्भकार + ङीप् (ई), औपगव + ङीप् (ई) अन्त्याकारस्य लोपे कुम्भकारी + सु, औपगवी + सु, उभयत्रापि सुलोपः। कुम्भकारी – कुम्भकार्यौ – कुम्भकार्यः, औपगवी – औपगव्यौ – औपगव्यः इति रूपाणि भवन्ति। एवमेव, सौपर्णेयी, ऐन्द्री सिद्ध्यन्ति।

**ऋ) अञन्तेभ्यः** - उत्सादिभ्योऽञ् इति सूत्रेण अञ् तद्धितो विहितः। औत्सः इति अञन्तः, तस्माद् ङीप्, अकारलोपे औत्सी + सु सुलोपः। औत्सी – औत्स्यौ – औत्स्यः।

**ऌ) द्वयसज्दघ्नमात्रजन्तेभ्यः –** प्रमाणे द्वयसज्दघ्नञ्मात्रचः इति सूत्रेण प्रमाणआर्थे एते प्रत्ययाः विहिताः। ऊरू प्रमाणमस्याः इत्यर्थे ऊरूद्वयस्, ऊरुदघ्न, ऊरुमात्र, इति तत्तत्प्रत्ययान्ताः, तेभ्यः ङीप् ऊरुद्वयस् + ङीप् (ई) अकारलोपे ऊरुद्वयसी इति भवति। एवमेव ऊरुदघ्नी, ऊरुमात्री इत्यत्रापि बोद्ध्यम्।

**ए) तयबन्तेभ्यः –** संख्याया अवयवे तयप् इत्यनेन तयप् तद्धितः अवयवार्थे विहितः। पञ्च अवयवाः अस्य इत्यर्थे पञ्चतय इति भवति। तस्मादनेन स्त्रीत्वे ङीप् पञ्चतय + ई अकारलोपे पञ्चतयी + सु, सुलोपः। पञ्चतयी – पञ्चतय्यौ – पञ्चतय्यः।

**ऐ) ठगन्तेभ्यः –** तेन दीव्यति खनति जयति जितम् इत्यनेन दीव्यतीत्याद्यर्थेषु ठक् विहितः। अक्षैः दीव्यति – आक्षिकः, अभ्रया खनति – आभिकः, अक्षैः जयति – आक्षिकः, अक्षैः जितम् – आक्षिकम्, एतेभ्यः स्त्रीत्वे ङीपि सति अकारलोपे, सलोपो आक्षिकी, आभ्रिकी। आक्षिकी – आक्षिक्यौ – आक्षिक्यः इति ईकारान्तस्त्रीलिङ्गशब्दरूपाणि भवन्ति।

**ओ) ठञन्तेभ्यः –** लवणाठ्ठञ् इत्यनेन लवणशब्दात् ठञ् प्रत्ययस्तद्धितो विहितः। लावणिक इति ठञन्तः, तस्मात् ङीप् अकारलोपे लावणिकी इति भवति।

**औ) कञन्तेभ्यः –** त्यदादिषु दृशोऽनालोचने कञ् च इति सूत्रेण त्यदादिषूपदेषु अज्ञानार्थादृश् धातोः कञ् प्रत्ययो विहितः। तादृश इत कञन्तः, तस्मात् ङीपि सति, अकारलोपे तादृशी + सु, सुलोपे, तादृशी – तादृश्यौ – तादृश्यः इति रूपाणि भवन्ति।

**क) क्वरप् –** इण्नशजिसर्तिभ्यः क्वरप् इति सूत्रेण इण्, नश्, जि, सृ एभ्यः कृत् क्वरप् प्रत्ययो विहितः। इत्वर, नश्वर, जित्वर, सृत्वर इति क्वरबन्ताः। तेभ्यो ङीपि अकारलोपे इत्वरी + सु, सुलोपः, इत्वरी, नश्वरी, जित्वरी, सृत्वरी इति ईकारान्तस्त्रीलिङ्गा भवन्ति। एवमेव –

| | | |
|---|---|---|
| नञन्तेभ्यः | – | स्त्रैणी |
| स्नञन्तेभ्यः | – | पौस्नी |
| ईकक् | – | शीक्तीकी |
| ख्युन् | – | आढ्यङ्करिणी |
| तरुणशब्दस्य | – | तरुणी |
| तलुनशब्दस्य | – | तलुनी |

**ख) प्रथमवयोवाचिभ्योऽदन्तेभ्यः** स्त्रियां ङीप् भवति। यथा – कुमार इत्यदन्तवयोवाची। तस्मान्ङीप् कुमार + ङीप् – कुमार + ई, अकारलोपे कुमारी इत्यस्मात् स्वादयो भवन्ति। कुमारी – कुरमार्यौ – कुमार्यः इति ईकारान्तश्शब्दः।

**ग) अदन्तद्विगोरपि** स्त्रियां ङीप् भवति। त्रयाणां लोकानां समाहारः इति समाहारद्विगुः त्रिलोक इति द्विगुसमासस्य ङीपि सति त्रिलोक + ङीप् त्रिलोक + ई अकारलोपे त्रिलोकी + सु, सुलोपे त्रिलोकी। त्रिलोकी – त्रिलोक्यौ – त्रिलोक्यः।

**घ) वर्णवाच्यनुदात्तान्तेभ्यः, तोपधेभ्यः**, प्रातिपदिकेभ्यो ङीप् भवति, तकारस्य नकारादेशश्च भवति। एत शब्दो वर्णवाची तोपधश्च अत अस्य स्त्रीत्वे ङीप् एत + ङीप् तकारस्य नकारादेशे, अकारलोपे एनी + सु – सुलोपे एनी – एन्यौ – एन्यः।

विकल्पेनात्र ङीब् विहितः। तदभावे एता अत्र टाप् भवति। एता – एते – एताः अकारान्तस्त्रीलिङ्गशब्दवत्। एवमेव रोहितशब्दस्य ङीपि सति रोहिणी तदभावे रोहिता इति भवतः।

**5. ङीष् प्रत्ययः –** षिद्भ्यः, गौरादिभ्यः, पुंयोगेभ्यः, इन्द्रवरुणादिशब्देभ्यः, उदन्तगुणवाचिनः बाह्वादिभ्यः, करणपूर्वकक्रीतशब्दात्, स्वाङ्गवाचिभ्यः, जातिवाचिभ्यः इकारान्तमनुष्यजातिवाचकेभ्यः स्त्रियां ङीष् भवति।

1. **षिद्भ्यः** – षकारः इत् यस्य सः – षित्, षिद्भ्यः प्रातिपदिकेभ्यः ङीष् भवति। गार्ग्यायण इति ष्फप्रत्ययान्तः। अतस्तस्माद् षित्त्वेन ङीप्, गार्ग्यायण + ङीष्, अकारलोपे गार्ग्यायणी + स्, सुलोपे गार्ग्यायणी – गार्ग्यायण्यौ – गार्गायण्यः। एवमेव वात्स्यायनी।

2. **गौरादिगणपठितेभ्योऽपि** ङीष् प्रत्ययो भवति। गौर + ङीष्, गौर + ई अकारलोपे, गौरी + सु, सुलोपे – गौरी – गौर्यौ – गौर्यः। एवमेव अनडुही, अनड्वाही, नर्तकी इत्यादिशब्दाः।

3. स्वतः सुम्बोधक एव शब्दः पुंयोगात् स्त्रियं बोधयति चेत् तेभ्योऽपि ङीष् भवति। यथा – गोपस्य स्त्री इत्यर्थे ङीष् भवति। अत्र गोपी इति पदं गोपपत्नीं बोधयति। गोपालकस्य स्त्री इत्यर्थे तु ङीष् न भवति, किन्तु टाबेव। कृष्णस्य पत्न्यः (Mrs. Krishna) इति आंग्लभाषायामपि व्यवह्रियते खलु। अत्र मूलं पाणिनिसूत्रमेव।

4. इन्द्र, वरुण, भव, शर्व, रुद्र, मृड, हिम, अरण्य, यव, यवन, एतेभ्यः ङीष् भवति, शब्दानामेतेषाम् आनुक् इत्यागमोऽपि भवति। आन् इत्येव शिष्यते। इन्द्रस्य स्त्री इत्यर्थे इन्द्र + आन् + ङीष् (ई) नकारस्य णकारः इन्द्राणी + स्, सुलोपे इन्द्राणी इति पदं भवति। एवमेव वरुणानि, भवानी, शर्वाणी, रुद्राणी, मृडानी, हिमानी, अरण्यानि, यवानी, यवनानि इति।

हिमारण्ययोर्महत्त्व एव प्रत्यय आनुगागमश्च भवतः। अतो महद्धिमं हिमानी, महत्पदम् + अरण्यानी। यवनशब्दस्य लिप्यामेव एतौ भवतः। यवनानां लिपिः – यवनानी।

5. उदन्तगुणवचनेभ्यो वा ङीष् भवति। पटु शब्दात् ङीषि सति पटु + ई, यणादेशे, पट्वी + सु, सुलोपः पट्वी। न भवति चेत् पटुः। मृदुशब्दस्य ङीषि सति मृद्वी तदभावे मृदुः इति भवति।

6. बहु इत्यारभ्य गणे ये पठितास्तेभ्यः ङीष् विकल्पेन भवति। बहु + ङीष् – बह्वी + सु, सुलोपः बह्वी, तदभावे बहुः इति भवति।

7.. करणतृतीयान्तपूर्वकक्रीतशब्दादपि ङीष् भवति। वस्त्रेण क्रीतेत्यर्थे अनेन सूत्रेण ङीषि, वस्त्रक्रीत + ङीष्, वस्त्रक्रीत + ई अकारलोपे, सुप्रत्यये, लोपे वस्त्रक्रीती इति भवति।

8.. स्वाङ्गवाचकेभ्यः प्रातिपदिकेभ्यः वा ङीष् भवति। स्वाङ्गलक्षणानि एवं प्रतिपादितानि –

- अद्रवं मूर्तिमत्स्वाङ्गम्[6]
- प्राणिस्थमविकारजम्। अतत्स्थं तत्र दृष्टं च[7]
- तेन चेत्तत्तथा युतम्।।[8]

उहाहरणम् – केशानतिक्रिन्ता – अतिकेशी, ङीष् तदभावे टाप् अतिकेशा। सुकेशी – सुकेशा, सुस्तनी – सुस्तना, स्वाङ्गलक्षणेन एतेभ्यः विकल्पेन ङीष् भवति।

9. जातिवाचकेभ्यः प्रातिपदिकेभ्योऽपि ङीष् भवति। जातिलक्षणानि एवं प्रोक्तानि।

- आकृतिग्रहणा जातिः।[9]
- लिङ्गानां च न सर्वभाक्। सकृताख्यातनिर्ग्राह्या[10]

---

6 वैयाकणसिद्धान्तकौमुदी

7 तत्रैव

8 तत्रैव

9 तत्रैव

10 तत्रैव

- गोत्रं च चरणैः सह।[11]

उदाहरणानि – अनुगतसंस्थानव्यङ्ग्या, यथा – तटी इति प्रथमजातिलक्षणस्योदाहरणम्। द्वितीयलक्षणस्य वृषली इत्युदाहरणं भवति। तृतीयलक्षणस्य अपत्यप्रत्ययान्ताः शाखाध्येतृवाचकाः शब्दाः उदाहरणानि भवितुमर्हन्ति। यथा – औपगवी, कठी, कलापी, वह्वृची इति। औपगवीति अपत्यप्रत्ययान्तस्योदाहरणम्। उपगोः अपत्यं स्त्री इत्यर्थे तस्यापत्यम् इति तद्धितः अण् अपत्यप्रत्ययान्तत्वेन औपगवः – उपगुः + ङस् + अण् (ङस् सुपो धातुप्रातिपदिकयोः इति लुक्)।

उपगु + अ (गुणः) उपगो + अ (अवादेशः) औपगवः + ङीष् – अकारलोपः – औपगवी + सु, सुलोपः औपगवी इति रूपं भवति। कठी, कलापी, बह्वृची, इत्यादयः शाखाध्येतृवाचकानामुदाहरणानि भवन्ति।

10. इकारान्त मनुष्यजातिवाचकेभ्योऽपि ङीष् भवति। दक्षस्य अपत्यम् – दाक्षि इति भवति। इकारान्तमनुष्यजातिवाचित्वेन स्त्रीत्वे दाक्षि + ङीष् सवर्णदीर्घे दाक्षी + स्, सुलोपे दाक्षी इति भवति। एवमेव उदमेयस्य अपत्यं स्त्री – औदमेयी इत्यपि।

**11. ङीन् प्रत्ययः –** शाङ्र्गरव इति कश्चन गणोऽस्ति। तद्गणपठितेभ्यः शब्देभ्यो ङीन् प्रत्ययो भवति। एवं नृ, नर शब्दयोरपि प्रत्ययोऽयं तत्सन्नियोगेन वृद्धिरपि जायते।

शाङ्र्गरव + ङीन्, शाङ्र्गरव + ई – अकारलोपे शाङ्र्गरवी + स्, सुलोपे शाङ्र्गरवी – शाङ्र्गरव्यौ – शाङ्र्गरव्यः। एवमेव बैदी, कापटवी, गौग्गुलवी, ब्राह्मणी।

नुः स्त्री, नरस्य स्त्री वा इत्यर्थे नारी इति भवति।

**7. ऊङ् प्रत्ययः –** उकारान्त मनुष्यजातिवाचकेभ्यः स्त्रियाम् ऊङ् प्रत्ययो भवति। पङ्गुः शब्दस्य अयं प्रत्ययो भवति। श्वशुर शब्दस्य विशेषतया उकाराकारयोर्लोपेऽपि भवति, एवम् उपमानवाचिपूर्वपदरूत्तरपदं भवति चेत्तेभ्योऽपि प्रत्ययो भवति, सहित, शफ, लक्षण, वामादिशब्देभ्योऽपि अनौपम्येऽपि ऊरूत्तरपदे उङ् प्रवर्तते।

कुरु इति उकारान्त मनुष्यजातिवाचक शब्दः। तस्य स्त्रियाम् ऊङ्-प्रत्यये कुरू + स्, रुत्वे विसर्गे कुरुः। पङ्गुशब्दस्य स्त्रीत्वे ऊङि, पङ्गुः। श्वश्रूः (श्वशुरस्य स्त्री इत्यर्थः) करभादिव ऊरू यस्याः सा इत्यर्थे करभावित्यस्य उपमानवाचित्वात् ऊरूत्तरपदत्वे करभोरू + ऊङ्, सवर्णदीर्घे करभौरू + स् – करभौरूः।

हितेन सह वर्तते – सहितः, सहितौ ऊरू यस्याः सा इत्यर्थे उरूत्तरपदसहितोरुशब्दस्य ऊङि, सहितोरूः इति रूपं भवति। एवमेव –

- शफौ ऊरू यस्याः सा – शफोरूः।
- लक्षणे ऊरू यस्याः सा – लक्षणोरूः।
- वामे ऊरू यस्याः सा – वामोरूः।

**8. तिप्रत्ययः –** अयं तिप्रत्ययो युवन् शब्दात् स्त्रीत्वे भवति। युवन् + ति, तिप्रत्यये परे पूर्वस्य पदसंज्ञायां, नलोपे, युवति, स्तरीप्रत्ययान्तत्वेन प्रातिपदिकसंज्ञायां स्वादयो भवन्ति। युवतिः – युवती – युवतयः।

[11] तत्रैव

**सहायकग्रन्थसूची**

1. **अष्टाध्यायीसहजबोधः** – पुष्पा दीक्षित, पाणिनीयशोधसंस्थान, छत्तीसगढ, 2004.
2. **निघण्टु**, यास्कः, श्रीमत्स्वामिदयानन्दसरस्वरीकृतशब्दानुक्रमणिकया सहितः, वैदिक पुस्तकालय अजमेर.
3. **पाणिनीय अष्टाध्यायीसूत्रपाठः** सम्पा – कृष्णदास अकादमी वारणसी, पं सत्यनारायणशास्त्री खण्डुडी, 2012
4. **प्रौढमनोरमा**, (प्रथमो भागः) भट्टोजिदीक्षित, सम्पा. – श्रीसीतारामशास्त्री, काशी हिन्दू विश्वविद्यालयः, वाराणसी, वैक्रमाब्द – 2021
5. **भूषणसार-परमलघुमञ्जुषयोः सिद्धान्तानां समीक्षा**, डा. राममनोहरमिश्रः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी।
6. **लघुशब्दन्दुशेखरः**, नागेशभट्टः, चौखम्बासंस्कृतप्रतिष्ठानदिल्ली – 2001.
7. **लघुशब्देन्दुशेखरः**, वाराणसी, चौखम्बा विद्याभवन, हरिनारायण तिवारी, सम्पा. – 2014.
8. **व्याकरणमहाभाष्यम्,**चौखम्बा संस्कृतप्रतिष्ठान, दिल्ली, 2021.
9. **वाक्यपदीयम् (ब्रह्मकाण्डम्)**, भर्तृहरिः, चौखम्बा विद्याभवन, वाराणसी, 2006..
10. **वैयाकरणभूषणसारः**, कौण्डभट्टः, चोखम्बासंस्कृतसिरीज्, वाराणसी, 1969.
11. **वैयाकरणसिद्धान्तकौमुदी**, (संश्रिगिरिधरशर्मा, म. म (मोतीलाल बनारसीदास, देहली, 1997.
12. **वैयाकरणसिद्धान्तकौमुदीतत्त्वबोधिनीसहिता**, चौखम्बा विद्याभवन, वाराणसी, 2006.